**दिनाङ्क :- 10.09.2026**
**प्रात: - 06:55**

## अथवार्ताः

### मन्त्रिमण्डलम् – रेलमार्गः

प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां केन्द्रीयमन्त्रिमण्डलेन नवराज्येषु अष्टशताधिक-विंशतिसहस्रकोटितोप्यधिकव्ययुताः अष्ट-रेलबहुमार्गीकरण-परियोजनाः अनुमोदिताः। एतासु परियोजनासु प्रायः षण्णवत्यधिक-एकादशशत-कि.मी.मिताः रेलमार्गाः सम्मिलिताः भविष्यन्ति। एताभिः रेलसम्पर्कव्यवस्थायां परिष्कारः, विद्यमानमार्गेषु यातायातसम्मर्दस्य न्यूनीकरणं तथा यात्रिणां मालवाहनस्य च द्रुततरगमनं सुकरं भविष्यति। एतासां परियोजनानां नवविंशत्यधिक-द्विसहस्रतमवर्षाद् त्रिंशदधिक-द्वि-सहस्रतमवर्षपर्यन्तं पूर्णत्वस्य लक्ष्यं निर्धारितम् अस्ति। केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः ह्यः नवदिल्ल्यां वार्ताहरान् सम्बोधयन् केन्द्रीयमन्त्रिमण्डलेन गृहीतानां निर्णयानां विवरणं प्रदत्तवान्। सः उक्तवान् यत् मन्त्रिमण्डलेन तमिलनाडु-आन्ध्रप्रदेश-कर्नाटक-तेलङ्गानाराज्येषु सप्तदशजनपदेषु विस्तृताः पञ्चरेलबहुमार्गीकरण-परियोजनाः अनुमोदिताः। एताभिः परियोजनाभिः विद्यमानभारतीयरेलजाले प्रायः चत्वारिंशदधिक-पञ्चशतकिमीमितः रेलमार्गः वर्धिष्यते। एतासां पञ्चपरियोजनानाम् अनुमानितव्ययः आहत्य एकविंशत्यधिक-दशसहस्रकोटिरूप्यकाणि अस्ति।

श्रीवैष्णवः उक्तवान् यत् प्रशासनेन सप्तशताधिक-दशसहस्रकोटिरूप्यकेभ्यः अधिकमूल्याः तिस्रः अन्याः रेलबहुमार्गीकरण-परियोजनाः अपि अनुमोदिताः। एताः परियोजनाः पश्चिमबङ्गाल-झारखण्ड-ओडिशा-मध्यप्रदेश-छत्तीसगढराज्यानां चतुर्दश-जनपदेषु विस्तरिष्यन्ते। एकस्य प्रश्नस्य प्रत्युत्तरे श्रीवैष्णवः सूचितवान् यत् मुम्बई-अहमदाबाद-बुलेट्-ट्रेन्-सेवा आगामिवर्षे प्रारप्स्यते।

### भारतम् - विश्वकौशलप्रतियोगिता

भारतम् अष्टचत्वारिंशत्तम-विश्वकौशलप्रतियोगितायां प्रथमवारम् एकादश-नूतनकौशल-श्रेणीषु सहभागं करिष्यति। इयं प्रतियोगिता अस्य मासस्य द्वाविंशतितः सप्तविंशतिदिनाङ्कपर्यन्तं चीनदेशस्य शङ्घाई-नगरे आयोजयिष्यते। कौशलविकास-उद्यमितामन्त्रालयेन सूचितं यत् टीम स्किल इण्डिया इत्येतत् चतु:षष्टि-कौशलेभ्यः त्रिषष्टि-कौशलेषु प्रायः सप्ततिप्रतियोगिताभिः युक्तेन दलेन सहभागं करिष्यति। मन्त्रालयेन उक्तं यत् अद्यावधि विश्वकौशलप्रतियोगितायाम् इयं भारतस्य बृहत्तमा विविधतापूर्णा च सहभागिता भविष्यति।

### गोयल - ब्रिक्स महिला

केन्द्रीयवाणिज्योद्योगमन्त्री पीयूषगोयलः ब्रिक्स्-देशेभ्यः महिलाभ्यः अवसरविस्ताराय तथा अन्ताराष्ट्रियव्यापारे महिला-उद्यमिनीनां महिलानेतृत्वाधीनानां च उद्यमानां प्रोत्साहनाय मिलित्वा कार्यं कर्तुम् आह्वानं कृतवान्। श्रीगोयलः बलं दत्तवान् यत् महिला-नेतृत्वाधीनेभ्यः उद्यमेभ्यः अन्ताराष्ट्रियव्यापारे अवसरानां लाभं स्वीकर्तुं स्वकीयां सहभागितां च वर्धयितुं आवश्यकं सहकार्यं मञ्चश्च प्रदातव्यौ।

### ग्रामीणविकासः

ग्रामीणविकासमन्त्रालयस्य अन्तर्गतं भूमिसंसाधनविभागः अद्य डिजिटल इण्डिया लैण्ड रिकॉर्ड्स मॉडर्नाइजेशन प्रोग्राम 3.0 इत्यस्य कार्यान्वयनसम्बद्धान् दिङ्निर्देशान् प्रकाशयिष्यति। मन्त्रालयेन सूचितं यत् आगामि DILRMP 3.0 इत्येतत् पञ्च शून्यं दशांशोत्तर पञ्चषष्ट्यधिक-पञ्चशतकोटि-रूप्यकाणाम् अनुमानितवित्तव्ययेन केन्द्रीयक्षेत्रीययोजनारूपेण कार्यान्वितं भविष्यति। विभागेन सर्वेषु राज्येषु केन्द्रशासितप्रदेशेषु च अस्य महत्त्वाकाङ्क्षिणः पञ्चवर्षीयकार्यक्रमस्य कार्यान्वयनं करिष्यते।

**ऋतुविभागः**

भारतर्तुविज्ञान-विभागेन ओडिशायाः पृथक्-पृथक् स्थलेषु अद्य प्रबलातिप्रबलवृष्टेः सम्भावनां दृष्ट्वा रक्तवर्णपरा सञ्चेतना प्रसारिता अस्ति।

ऋतुविभागेन आगामिषु अष्टचत्वारिंशत्-होरासु असम-मेघालय-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-गाङ्गीय-पश्चिमबङ्गाल-बिहार-झारखण्ड-छत्तीसगढ-केरल-माहे-उत्तराखण्डेषु प्रबलवृष्टिः पूर्वानुमानिता।

ऋतुविभागेन अद्य तटीय-आन्ध्रप्रदेशे उष्णस्य आर्द्रस्य च वातावरणस्य पूर्वानुमानमपि कृतम् अस्ति।

**।। इति वार्ता:।।**